
# षोडशः पाठः

## अहिंसायाः जयः



पुरा कोशलदेशे एकः भीषणः दस्युः अवसत्। तस्य नाम अङ्गुलिमालः आसीत्। लोकानां लुण्ठनं हननं च तस्य दैनिकं कृत्यम्। असौ यान् हन्ति स्म, तेषाम् अङ्गुलीः छित्त्वा ताभिः मालां विरच्य कण्ठे अधारयत्। अतः तस्य 'अङ्गुलिमाल' इति नाम्ना ख्यातिः जाता। अङ्गुलिमालस्य दुष्कृत्यैः प्रजाऽतीव दुःखिता आसीत्। राजा प्रसेनजितोऽप्यस्य क्रूरकृत्येन भृशं कष्टं प्राप्नोत्। राजा तस्य निग्रहणे बहु प्रायतत, सैन्यबलं च प्रैषयत् परं साफल्यं नालभत।भगवतो बुद्धस्य शिष्यः

प्रसेनजितः तद्विषये बुद्धं न्यवेदयत्।बुद्धस्तदानीम् अङ्गुलिमालस्य समक्षं धर्ममुपदेष्टुं गतः परं सः बुद्धमवलोक्य क्रूरतया हन्तुम् अधावत्। बुद्धः स्वतपोबलेन ज्ञानं प्राकाशयत्। बुद्धस्य करुणार्द्रभावं विलोक्य स चकितोऽभूत् तथा बुद््धस्य समक्षमवनतोऽभवत्। बुद्धस्तदा धर्मस्य परहितस्य प्रेम्णः करुणायाश्च शिक्षां तं अपाठयत््।बुद्धस्य उपदेशप्रभावाद् अङ्गुलिमालस्य अज्ञानान्धकारः नष्टः। सः अङ्गुलीनां मालां छित्त्वा खड्गं प्राक्षिपत्। सः परपीडनं हिंसां च परित्यज्य दयाभावं प्राप्नोत्। बुद्धस्य सः शिष्यः अभवत्। एवं हिंसायाम् अहिंसाया विजयोऽभवत्।

**शब्दार्थः**

**पुरा**=प्राचीन काल में। **भीषणः**=भयङ्कर। **दस्युः**=डाकू। लोकानाम्=जनता का। **असौ**=वह। **लुण्ठनम्**=लूटना। **हन्तिस्म**=मारता था। **यान्**=जिनक ं। **अङ्गुलीः**=अङ्गुलियों को। **छित्त्वा**=काटकर। **विरच्य**=बनाकर। **अधारयत्**=पहन लिया। **भृशम्**=अतिशय। **निग्रहणे**=पकड़ने में। **प्रायतत**=प्रयास किया। **प्रैषयत्**=भेजा। **नालभत**=नहीं प्राप्त किया। **न्यवेदयत्**=निवेदन किया। **उपदेष्टुम्**=उपदेश देने हेतु। **हन्तुमधावत्**=मारने के लिए दौड़ा। **प्राकाशयत्**=प्रकाशित किया। अवनतोऽभूत्‌्=झुक गया। **परपीडनम्**=दूसरों को सताना। **प्राक्षिपत्**=फेंक दिया। **हिंसायाम्**=हिंसा पर।

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

अहिंसैव, प्रजाऽतीव, पै्रषयत्,

न्यवेदयत्, बुद्धस्तदानीम्, धर्ममुपदेष्टुम्।

**2. एकपदेन उत्तरत-**

(क) कोशलदेशे कः दस्युः आसीत्?

(ख) अङ्गुलिमालस्य दुष्कृत्यैः के दुःखिताः आसन् ?

(ग) कस्य उपदेशप्रभावाद् अङ्गुलिमालस्य अज्ञानान्धकारः नष्टः अभवत् ?

(घ) अङ्गुलिमालः हिंसां परित्यज्य कं भावं प्राप्नोत् ?

**3. वाक्यानि पूरयत-**

(क) लोकानाम् ................................ कृत्यम्।

(ख) बुद्धस्तदा ................................ चाददात्।

(ग) बुद्धस्य ................................. नष्टः।

(घ) सः परपीडनम् ............................... प्राप्नोत्।

**ध्यातव्यम्**

खाकर, पढ़कर, आकर, देकर इति पदानां कृते धातुना सह क्त्वा (त्वा) ल्यप् (य) प्रत्ययौ

योजयित्वा खादित्वा, पठित्वा, आगत्य, आदाय पदानि च रचयामः। वाक्ये- 'प्रवीणः रोटिकां

खादित्वा विद्यालयं गच्छति' प्रयोगः भवति।

4. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-

नीत्वा, पठित्वा, दृष्ट्वा, श्रुत्वा, त्यक्त्वा, पीत्वा।

(क) रमा विद्यालयात् ................................ आगच्छति।

(ख) वाहिदः चित्रं ................................ हसति।

(ग) बालकः कथां .................................. शेते।

(घ) मोहनः दुग्धं ...............................क्रीडति।

(ङ) पक्षिणः तृणं ................................ उत्पतन्ति।

(च) वयं दुर्गुणान् ................................ सन्मार्गे चलामः।

अभ्यासः

5. सन्धिविच्छेदं कुरुत-

पदम् सन्धिविच्छेदः

यथा-प्रजातीव =प्रजा + अतीव

अज्ञानान्धकारः ............... + ................

करुणार्द्रभावम् ................ + ................

बुद्धस्तदा ................ +...............

**6- पाठात् क्रियापदानि चित्वा लिखत-**

यथा- आसीत् ........ ........ .........

......... ........ .........

**शिक्षण-सङ्केतः**

1. अहिंसया हिंसां जेतुं शक्नुमः एतद् विषये छात्रान् बोधयत।

2. अङ्गुलिमालस्य विषये उक्ता इयं कथा बौद्धजातकाद् गृहीता अस्ति।

बौद्धजातके एतादृश्यः अन्याः कथाः अपि सन्ति इति छात्रान् बोधयत।

3. शिक्षकः कक्षायाम् अस्य पाठस्य अभिनयं कारयेत्।

**एतदपि जानीत-**

अस्माकं राष्ट्रीयचिह्ने अंकितवाक्यं ‘सत्यमेव जयते’ मुण्डकोपनिषदात् गृहीतम्।